'णौ वा णौ–अपवारणे छदत इत्येकम्, द्वितीयं छदेत्, (छदन्)
अन्यत् छादयति, छदेदिति पुनः स्यादूर्जनेऽर्थे मितः ।
यत्तु च्छन्दयतीति णौ नुमि पदं–तत संवृताविष्यते'–(श्लो. 113) इति देवः ।

[1]छादकः-दिका, [2]चिच्छादयिषकः-षिका, [3]छादकः-दिका, चिच्छदिषकः-षिका, [4]चाच्छदकः-दिका, [5]छदकः-दिका ;

छादयिता-त्री, चिच्छादयिषिता-त्री, छदिता-त्री, चिच्छदिषिता-त्री, चाच्छदिता-त्री, छदयिता-त्री ;

छादयन्-न्ती, चिच्छादयिषन्-न्ती, [A]छदन्-न्ती, चिच्छदिषन्-न्ती, —— छदयन्-न्ती ;

छादयिष्यन्-न्ती-ती, चिच्छादयिषिष्यन्-न्ती-ती, छदिष्यन्-न्ती-ती, चिच्छदिषिष्यन्-न्ती-ती, —— छदयिषिष्यन्-न्ती-ती ;

छादयमानः, चिच्छादयिषमाणः, [6]छदमानः, चिच्छदिषमाणः, चाच्छद्यमानः, छदयमानः ;

छादयिष्यमाणः, चिच्छादयिषिष्यमाणः, छदिष्यमाणः, चिच्छदिषिष्यमाणः, चाच्छदिष्यमाणः, छदयिषिष्यमाणः ;

---

1. स्वार्थे णिचि, 'अत उपधायाः' (7-2-116) इति वृद्धौ रूपम् ।
2. ण्यन्तात् सनि, अभ्यासात् परतः, 'छे च' (6-1-73) इति तुक् । 'स्तोः श्चुना श्चुः' (8-4-40) इति श्चुत्वेन चकारः । एवं सन्नन्ते यङन्ते च बोध्यम् ।
3. 'आधृषाद्वा' (गणसूत्रं चुरादौ) इति णिचो वैकल्पिकत्वम् । तेन, णिजभावपक्षे शुद्धाद्धातोर्ण्वुलि रूपम् । ण्यन्तप्रकृतिकण्वुलन्तस्य, अस्य चार्थभेदो नास्ति ।
4. णिजभावपक्षे, यङन्ते, 'दीर्घोऽकितः' (7-4-83) इत्यभ्यासस्य दीर्घे, 'दीर्घात्' (6-1-75) इति तुकि, तस्य श्चुत्वेन चकारे रूपम् । एवमुत्तरत्रापि रूपनिष्पत्तिर्ज्ञेया ।
5. 'छदिरूर्जने' (गणसूत्रम्-भ्वादौ) इति घटादिषु पाठेनास्य मित्त्वात्, अस्मात्, हेतुमण्णिचि परतः, उपधावृद्धौ, 'मितां ह्रस्वः' (6-4-92) इति ह्रस्वे, 'छदकः-दिका' इत्यादीनि, ऊर्जनार्थे विद्यमानस्यास्य धातोर्णौ बोध्यानि ।
6. धातोः स्वरितेत्त्वेन, शुद्धात्, 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' (1-3-72) इति आत्मनेपदम् । परगामिनि क्रियाफले तु, 'शेषात् कर्तरि परस्मैपदम्' (1-3-78) इति परस्मैपदमपि भवति ।

A. 'मल्लोऽर्यः स च हिंसितः पदमुपासात्सीद्धरेः शुम्भितः
तावत् स्वं बलमच्छदन् जुषितवान् मुष्ट्या हली मुष्टिकम् ॥' धा. का. 3-50.